संस्कृत वार्ताः

12/01/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् यूनां शक्ति: शीघ्रमेव भारतं विकसितराष्ट्रं विधास्यति।

· छत्तीसगढ़स्य बीजापुर-जनपदे अद्य सुरक्षाबलैः सह सङ्घर्षे त्रयः माओवादिनः व्यापादिताः।

· इसरो इति भारतीयान्तरिक्षानुसन्धान-संस्थानेन उपग्रह द्वयं स्थिरीकर्तुं महत्वपूर्णं साफल्यम् अवाप्तम्।

· आस्थाया: मानवतायाश्च महाकुंभस्य शुभारम्भ: श्व: उत्तरप्रदेशस्य प्रयागराजे भविष्यति।

· महिलानां क्रिकेट-क्रीडायां भारत-आयरलैंड दलयो: एक दिवसीय-क्रिकेट-शृंखलाया: द्वितीय-स्पर्धा अद्य राजकोट नगरे प्रचलति।

<u>प्रधानमन्त्री युवनेतार:</u>

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् यूनां शक्ति: शीघ्रमेव भारतं विकसितराष्ट्रं विधास्यति। राजधान्यां नवदिल्ल्यां भारत-मण्डपे प्रधानमन्त्री नरेन्द्र मोदी ऐषम: विकसित भारत युवनेतृ संवादं सम्बोधयति स्म।

श्रीमोदी अवोचत् यत् भारतस्य युवशक्ति: महत्वपूर्णं परिवर्तनं विदधाति। राष्ट्रिय युवदिवसस्य अवसरे प्रधानमन्त्री विश्वासं प्रकटयत् यत् नवसंततय: युवसन्ततय: च सर्वासां समस्यानां समाधानम् अन्वेष्यन्ति। श्रीमोदी अवोचत् यत् महत्वपूर्ण लक्ष्य प्राप्तये समेषां देशवासिनां प्रतिभागिता समेकित प्रयासा: च आवश्यका:। प्रधानमन्त्रिणा उक्तं यत् पूर्णविकसित भारतं आर्थिकरूपेण सामाजिकरूपेण तार्किकरूपेण सांस्कृतिकरूपेण च समृद्धं भविष्यति। अमुना उक्तं यत् विगते दशके पंच विंशति: कोट्याधिका: जना: निर्धनतात: समुत्थापिता:। प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् सम्पूर्णं राष्ट्रं अद्य स्वामीविवेकानन्दस्य स्मरणं करोति। स्वामी विवेकानन्दः युवभ्यः शाश्वत-प्रेरणा वर्तते। तेभ्यः निरन्तरं शक्ति-प्रदानं च करिष्यति। तेनोक्तं यत् प्रशासनं स्वामि-विवेकानन्दस्य विकसित-भारतस्य लक्ष्य-प्राप्तये वचनबद्धं वर्तते। अस्य प्रमाणम् अस्ति चन्द्रयानस्य सफलता। इदानीं वयं गगन-यानस्य सज्जतां कुर्म:। भारतं च त्रिंशदुत्तर-द्वि-

सहस्र-वर्षं यावत् स्वकीयम् अन्तरिक्ष- केन्द्रं स्थापयिष्यति। अवधेयं यत् त्रिदिवसीय: विकसित-भारत-युवनेतृ-संवाद: शुक्रवासरे आरब्ध:। अस्मिन् अवसरे श्रीमोदिना त्रिसहस्र युवनेतृभि: सह संवादो विहित:। अत्रावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिभागिभि: लिखिता: निबंधा: अपि लोकार्पिता:। इमे निबंधा: दश-विषयेषु लिखिता: सन्ति।

राष्ट्रियो युवदिवसः

देशे अद्य स्वामिनो विवेकानन्दस्य जयन्ती राष्ट्रिय-युवदिवसः च आमान्यते। महान् आध्यात्मिक-गुरवे दार्शनिक-चिन्तकाय स्वामि-विवेकानन्दाय राष्ट्रपतिना उपराष्ट्रपतिना प्रधानमन्त्रिणा च श्रद्धाञ्जलिः समर्पितः। एकस्मिन् सामाजिक-सञ्चार-पटले राष्ट्रपतिनोक्तं यत् स्वामिना विवेकानन्देन देशस्य महान् आध्यात्मिक- सन्देशः पश्चिम-जगति प्रचारित:। येन भारतीय-नागरिकेषु आत्मविश्वासः उत्पन्न:। तयोक्तं यत् स्वामि-विवेकानन्देन युवानः राष्ट्र-निर्माणे मानवतायाः सेवायां च योगदानाय प्रेरिताः। राष्ट्रपतिना कामना कृता यत् स्वामिनो विवेकानन्दस्य रिक्थम् एवमेव स्थास्यति, जगति असङ्ख्य-जनान् च प्रेरयिष्यति। उपराष्ट्रपतिना जगदीप-धनखडेन उक्तं यत् स्वामि- विवेकानन्देन त्रि-नवत्यधिक-अष्टादश-शततमे वर्षे शिकॉगो नगरे धर्म-संसदि भारतस्य आध्यात्मिकतायाः वर्चस्वं स्थापितम्। देशस्य समावेशि-लोकाचारम् च अभिव्यक्तम्। स्वामि-विवेकानन्देन भारतीय-जनाः स्वाभिमानाय आत्मविश्वासाय मानवतायाः च सेवायै च प्रेरिताः।

महाकुंभे-कलाग्राम:

आस्थाया: मानवतायाश्च महाकुंभ-संगमस्य शुभारम्भ: श्व: उत्तरप्रदेशस्य प्रयागराजे भविष्यति। अस्मिन् भव्य-आयोजने श्रद्धालुजनानां कृते सज्जाता पूर्णा जाता। महाकुम्भे सम्मिलितुं-बृहत् संख्यायां श्रद्धालव: प्रयागराजं प्रति गच्छन्ति। संस्कृति-मंत्रालयेन प्रयागराजे कलाग्रामस्य निर्माणं कृतम्। अस्मिन् कलाग्रामे देशस्य समृद्ध-जीवंत-संस्कृत्या: प्रदर्शनं भविष्यति। केन्द्रीय-संस्कृति-पर्यटन-मंत्री गजेन्द्र-सिंह-शेखावत: अद्य कलाग्रामस्य उद्घाटनं करिष्यति।

## छत्तीसगढ़े माओवादिनः

छत्तीसगढ़े अद्य सुरक्षाबलैः सह सङ्घर्षे त्रयः माओवादिनः व्यापादिताः। क्षेत्रे माओवादिनां गुप्तसूचना-प्राप्तेः अनन्तरं सुरक्षाबलानाम् एकं संयुक्तदलं बीजापुर-जनपदस्य नेशनल-पार्क इत्याख्ये क्षेत्रे अन्वीक्षणरतम् अवर्तत। अद्य प्रातः अन्वीक्षणस्य समये सङ्घर्षः प्रवर्तितः। सुरक्षा-बलैः व्यापादितानां माओवादिनां वपुंसि अधिगतानि। ततः प्रबल-मात्रायाम् आयुधानि विस्फोटकानि च प्राप्तानि ।

## इसरो

इसरो इति भारतीयान्तरिक्षानुसन्धान-संस्थानेन उपग्रह द्वयं स्थिरीकर्तुं महत्वपूर्णं साफल्यम् अवाप्तम्। इसरो इत्यनेन चेसर टार्गेट इति उपग्रहौ सुरक्षित-दूरतायां स्थातुं सफलता प्राप्ता। अनयो: उपग्रहयो: कार्यं यदि सम्यकतया पूर्णं भविष्यति, चेत् भारतम् अमेरिका रूस चीन राष्ट्राणां पश्चात् चतुर्थ: देश: भविष्यति। य: स्वकीयं अन्तरिक्ष केन्द्रं निर्मास्यति।

## विदेशमन्त्री ट्रम्प-शपथः

विदेश-मन्त्री डॉ. एस. जयशङ्करः अमरीकायाः नव-निर्वाचित- राष्ट्रपतेः डोनाल्ड-ट्रम्प इत्यस्य शपथ-ग्रहण-समारोहे भारतस्य प्रतिनिधित्वं करिष्यति। डोनाल्ड-ट्रम्प इत्यसौ अमरीकायाः सप्त-चत्वारिंशो राष्ट्रपतिः भविष्यति। अस्य मासस्य विंशे दिने डोनाल्ड-ट्रम्पः पद-गोपनीयतायाः शपथं स्वीकरिष्यति। निज-यात्रावधौ डॉ-एस्. जयशङ्करः नूतन-प्रशासनस्य प्रतिनिधिभिः सह कार्यक्रमस्य सहभागिभिः अन्य-गणमान्यजनैः च समम् अपि मेलनं करिष्यति।

## ऋतुसञ्चेतना

ऋतुविज्ञान-विभागेन उक्तं यत् अद्य हिमाचल-प्रदेशे राजस्थाने च शीत-लहर्याः अनुमानं विद्यते। पञ्जाबे राजस्थाने हरियाणायां चण्डीगढे उत्तर- प्रदेशेस्य च कतिपय-पूर्व-भागेषु रात्रौ प्रातः काले च कुज्झटिकायाः सम्भावना वर्तते। हिमाचल-प्रदेशे उत्तराखण्डे पश्चिम-बङ्गालस्य गाङ्गेय-क्षेत्रे च सघन-कुज्झटिकायाः अनुमानम् अपि ऋतुविज्ञान-विभागेन प्रकटितम्। सिक्किमे ओडिशायां नागालैण्डे मणिपुरे मिजोरमे त्रिपुरायां च सघन-कुज्झटिका प्रवर्तयिष्यते। ऋतु-विभागेन उक्तं यत् तमिलनाडु-पुद्दुचेरी-कराईकल-क्षेत्रेषु आगामि पञ्चदिनेषु गर्जनस्य वर्षायाः विद्युत्-प्रभावस्य च आशंका वर्तते। सममेव ऋतु-विज्ञान-विभागस्य अनुसारं पश्चिम-हिमालय-क्षेत्रे अद्य वर्षा-हिमपातयोः आशङ्का अस्ति।

महिला हॉकी

हॉकी क्रीडायां महिला हॉकी इंडिया लीग इति स्पर्धामालिका अद्य आरभते। शृङ्खलायां प्रथम-स्पर्धायाम् अद्य दिल्ली एस. जी. पाइपर्स इति दलम् ओडिशा वारियर्स अनेन दलेन सह स्पर्धिष्यते। प्रतियोगितायाः औद्घाटनिका स्पर्धा रांची नगरे क्रीडिष्यते । इयं स्पर्धा रात्रौ चत्वारिंशत् निमेषाधिक अष्टवादने आरप्यते।

।। इति वार्ता:।।